तेककः-किका, तेककः-किका[1], तितेकिषकः-तितिकिषकः-षिका, तेतितकः-तिका ;
तेकिता-त्री, तेकयिता-त्री, तितेकिषिता-तितिकिषिता-त्री, तेतिकिता-त्री ;
[2]तिक्नुवन्-ती, तेकयन्-न्ती, तितेकिषन्-तितिकिषन्-न्ती ; —
— तेकयमानः, तेकयिष्यमाणः, तेतिक्यमानः, तेतिकिष्यमाणः ;
संतिक्-संतिग्-संतिकौ-संतिकः ; — —
तेकितम्-तः, तेकितः, तितेकिषितः-तितिकिषितः, तेतिकितः-तवान् ;
[3]तिकः, तेकः, तितेकिषुः-तितिकिषुः, तेतिकः ;
तेकितव्यम्, तेकयितव्यम्, तितेकिषितव्यम्-तितिकिषितव्यम्, तेतिकितव्यम् ;
तेकनीयम्, तेकनीयम्, तितेकिषणीयम्-तितिकिषणीयम्, तेतिकनीयम् ;
तेक्यम, तेक्यम्, तितेकिष्यम्-तितिकिष्यम्, तेतिक्यम् ;
ईषत्तेकः-दुस्तेकः-सुतेकः ; — —
तिक्यमानः, तेक्यमानः, तितेकिष्यमाणः-तितिकिष्यमाणः, तेतिक्यमानः ;
तेकः, तेकः, तितेकिषः-तितिकिषः, तेतिकः;
तेकितुम्, तेकयितुम्, तितेकिषितुम्-तितिकिषितुम्, तेतिकितुम् ;
तिक्तिः, तेकना, तितेकिषा-तितिकिषा, तेतिका ;
तेकनम्, तेकनम्, तितेकिषणम्-तितिकिषणम्, तेतिकनम् ;
तेकित्वा-तिकित्वा, तेकयित्वा, तितेकिषित्वा-तितिकिषित्वा, तेतिकित्वा ;
प्रतिक्य, [A]आतिक्य, प्रतितेकिष्य-प्रतितिकिष्य, प्रतेतिक्य ;
तेकम् २, तेकित्वा २, तिकित्वा २, } तेकम् २, तेकयित्वा २, } तितेकिषम्-तितिकिषम् २, तितेकिषित्वा-तितिकिषित्वा २, } तेतिकम् २; तेतिकित्वा २.

---

1. 'रलो व्युपधाद्धलादेः संश्च' (I-2-26) इति सेटः सनः कित्त्वविकल्पः। कित्त्वपक्षे गुणनिषेधः, कित्त्वाभावपक्षे गुणः। एवं सन्नन्ते सर्वत्र प्रक्रिया बोध्या। एवं क्त्वायामपि कित्त्वविकल्पो ज्ञेयः।
2. 'स्वादिभ्यः श्नुः' (3-1-73) इति श्नुः विकरणप्रत्ययः। तस्य ङिद्वद्भावादङ्गस्य गुणो न।
3. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कप्रत्ययः।

A. 'तामातिक्य पदे पदेन चिबुके चातिग्नुवन् पाणिना
चक्रे सङ्नुवतां वधे दधृगसात्रृज्वीं मनोज्ञाकृतिम्।' धा. का. 2.70.